सुखं गयासुरस्येतत्तस्मात् श्राद्धमयाक्षयम् ॥
मुण्डपृष्ठाच्च पूर्व्वस्मिन् पश्चिमे दक्षिणोत्तरे ।
सार्द्धं क्रोशद्वयं मानं गयायां ब्रह्मणेरितम् ॥
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
तन्मध्ये सर्व्वतीर्थानि त्रैलोक्ये यानि सन्ति वै ॥”

अथ गयामाहात्म्यादि ।

“गयायां न हि तत् स्थानं यत्र तीर्थं न विद्यते ।
सान्निध्यं सर्व्वतीर्थानां गयातीर्थं ततो वरम् ॥
ब्रह्मज्ञानेन किं साध्यं गोगृहे मरणेन किम् ।
वासेन किं कुरुक्षेत्रे यदि पुत्त्रो गयां व्रजेत् ॥
श्राद्धकृद्यो गयाक्षेत्रे पितॄणामनृणोऽपि सः ।
शिरसि श्राद्धकृद्यस्तु कुलानां शतमुद्धरेत् ॥
गयाशिरसि यः पिण्डान् येषां नाम्ना तु निर्व्वपेत् ।
नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः ॥
गत्वा वणिग्गयाशीर्षे प्रेतराजस्य पिण्डकम् ।
प्रददौ मनुजैः सार्द्धं स्वपितृभ्यस्ततो ददौ ॥
प्रेताः प्रेतत्वनिर्म्मुक्ता वणिक् च गृहमागतः ।
प्रेतराजः सह प्रेतैर्गयाश्राद्धाद्दिवं गतः ॥”*॥

“गयायां सर्व्वकालेषु पिण्डं दद्याद्विचक्षणः ।
अधिमासे जन्मदिने चास्तेऽपि गुरुशुक्रयोः ॥
न त्यक्तव्यं गयाश्राद्धं सिंहस्थेऽपि वृहस्पतौ ।
तथा दैवप्रमादेन प्रवहत्सु ग्रहेषु च ॥
पूतः कर्म्माधिकारी च श्राद्धकृद्ब्रह्मलोकभाक् ॥
मीने मेषे स्थिते सूर्य्ये कन्यायां कार्म्मुके घटे ।
नारद ! चिषु लोकेषु गयाश्राद्धं सुदुर्लभम् ॥”*॥

“मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः ।
वर्ज्जयित्वा कुरुक्षेत्रं विशालां विरजां गयाम् ॥
दण्डं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिण्डदः ।
दण्डं न्यस्य विष्णुपदे पितृभिः सह मुच्यते ॥
गयागजो गयादित्यो गायत्त्री च गदाधरः ।
गया गयासुरश्चैव षड्गया मुक्तिदायिकाः ॥”

अथ पिण्डानद्रव्याणि ।

“पायसेनाथ चरुणा सक्तुना पिष्टकेन वा ।
तण्डुलैः फलमूलाद्यैर्गयायां पिण्डपातनम् ॥
तिलकल्केन खण्डेन गुडेन सघृतेन वा ।
केवलेनैव दध्ना वा अन्नेन मधुनाथवा ॥
पिण्याकं सघृतं खण्डं पितृभ्योऽक्षयमित्युत ॥”

अथ गयास्थब्राह्मणपूजाविधिः ।

तत्रस्था ब्राह्मणा ब्रह्माणमूचुः ।

“त्वया यद्दत्तमखिलं तत् सर्व्वं शापतो गतम् ।
जीवनार्थं प्रसादं नो भगवन् ! कर्त्तुमर्हसि ॥
तत् श्रुत्वा ब्राह्मणान् ब्रह्मा प्रोवाचेदं दयान्वितः ।
तीर्थोपजीविका यूयमाचन्द्रार्कं भविष्यथ ॥
लोकाः पुण्यगयायां ये श्राद्धिनो ब्रह्मलोकगाः ।
युष्मान् ये पूजयिष्यन्ति तैरहं पूजितः सदा ॥”

अथ गयायां श्राद्धादिकरणार्थं तीर्थानि ।

प्रथमदिने गयाप्रवेशे फल्गुतीर्थे स्नानतर्पण-श्राद्धानि १ प्रेतशिलायां ब्रह्मकुण्डे स्नानं श्राद्धं षोडशपिण्डदानं प्रेतपर्व्वते तिलमिश्रितसक्तु-निक्षेपश्च २ पञ्चतीर्थमध्ये उत्तरमानसे स्नानं सपिण्डकं श्राद्धं सूर्य्यार्च्चनञ्च ३ दक्षिणमानसे उदीच्यां उदीचीतीर्थे स्नानम् ४ तस्य मध्ये कनखलतीर्थे स्नानम् ५ तस्य दक्षिणे दक्षिण-मानसे तीर्थत्रये स्नानं श्राद्धं सूर्य्यार्च्चनञ्च ६ फल्गुतीर्थे स्नानं तर्पणं सपिण्डकं श्राद्धं ततो गदाधरस्य दर्शनं पूजनञ्च ७ ॥ द्वितीयदिने धर्म्मारण्ये गमनं धर्म्मेश्वरनमनं बोधितरु-नमनञ्च ८ मतङ्गवाप्यां स्नानं तर्पणं श्राद्धं मत-ङ्गेशनमनं यूपकूपयोर्मध्ये श्राद्धञ्च ९ ॥ तृतीय-दिने ब्रह्मसरसि स्नानं सपिण्डकं श्राद्धं यूप-प्रदक्षिणं ब्रह्मनमनञ्च १० गोप्रचारसमीपे आम्रवृक्षसेचनम् ११ ततो यमकुक्कुरकाकबलि-दानं पुनः स्नानञ्च १२ ॥ चतुर्थदिने फल्गुतीर्थे स्नानादिकं ततो गयाशिरसि विष्णुपदस्य दर्शनं स्पर्शनं पूजनं तत्र सपिण्डकं श्राद्धञ्च १३ रुद्रः १४ ब्रह्मा १५ दक्षिणाग्निः १६ गार्हपत्यः १७ आहवनीयः १८ सत्यः १९ आवसथ्यः २० शक्रः २१ अगस्त्यः २२ क्रौञ्चः २३ मातङ्गः २४ कार्त्तिकेयः २५ गणेशः २६ कश्यपः एषां पदेषु श्राद्धम् २७ गजकर्णिकायां तर्पणम् २८ कनकेशकेदारनरसिंहवामनरथमार्गाणां पूज-नम् २९ ॥ पञ्चमदिने गदालोले स्नानं सपि-ण्डकं श्राद्धञ्च ३३ अक्षयवटे श्राद्धं ब्रह्मकल्पित-विप्राणां पूजनं पुरोधसे षोडशदानञ्च ३४ गायत्त्र्यां प्रातःसन्ध्याचरणं सपिण्डकं श्राद्धञ्च ३५ समुद्रततीर्थे स्नात्वा सावित्र्यां मध्याह्नसन्ध्या-चरणं पिण्डदानञ्च ३६ प्राचीसरस्वत्यां स्नात्वा सायाह्नसन्ध्याचरणं ३७ विशाला ३८ लेलि-हानम् ३९ भरताश्रमनामकरामतीर्थम् ४० पदा-ङ्कितम् ४१ मुण्डपृष्ठस्थगदाधरसमीपम् ४२ आकाशगङ्गा ४३ गिरिकर्णमुखं एषु स्नानं पिण्डदानञ्च ४४ वैतरण्यां स्नानं पिण्डदानं श्राद्धं गोदानञ्च ४५ घृतकुल्या ४६ मधुकुल्या ४७ देविकानदी ४८ शिलासङ्गम ४९ मधुस्रवासु स्नानं सपिण्डकं श्राद्धं पिण्डदानञ्च ५० दशाश्वमेधिकम् ५१ हंसतीर्थम् ५२ अमरकण्टकम् ५३ कोटितीर्थम् ५४ रुक्मिणीकुण्डं एषु पिण्डदानम् ५५ मार्कण्डेये-श्वर-५६ कोटीश्वरयोर्दर्शनं नमनञ्च ५७ दिवौ-कसां पुष्करिण्यां पितृभ्यो दानम् ५८ पङ्कजवने पाण्डुशिलायां श्राद्धम् ५९ सुस्वतीर्थे स्नानं तर्पणं पिण्डदानञ्च ६० गयाकूपे पिण्डदानं ६१ भस्मकूटे भस्मना स्नानम् ६२ सङ्गमतीर्थे स्नानम् ६३ धेनुकारण्ये पिण्डदानम् ६४ काम-धेनुपदे स्नात्वा कामदुघानमनम् ६५ ॥ * ॥

“कर्द्दमाले गयानाभौ मुण्डपृष्ठसमीपतः ।
स्नात्वा श्राद्धादिकं कृत्वा पितॄणामनृणो भवेत् ॥
फल्गुचण्डीस्मशानाख्यमङ्गलाद्याः समर्च्चयेत् ।
गयायाञ्च वृषोत्सर्गस्त्रिसप्तकुलमुद्धरेत् ॥”

इति वायुपुराणे गयामाहात्म्यम् ॥ * ॥

तत्र मरणे मुक्तिर्यथा, तत्रैव ३ अध्याये ।

“गदाधरोद्दिष्टतीर्थं सर्व्वतीर्थोत्तमोत्तमम् ।
मुक्तिर्भवेत् पितृणाञ्च कर्त्तॄणां श्राद्धतः सदा ॥
जरायुजा अण्डजा वा स्वेदजा वापि चोद्भिदः ।
त्यक्त्वा देहं शिलायां ते यान्ति विष्णुस्वरूपताम् ॥”

तत्रस्थजनार्द्दनहस्ते जीवितस्य पिण्डदानविधि र्यथा,—

“जनार्द्दनो भस्मकूटे तस्य हस्ते तु पिण्डदः ।
आत्मनोऽप्यथवान्येषां सव्येनैव तिलैर्व्विना ॥
जीवतां दधिसंमिश्रं सर्व्वे ते विष्णुलोकगाः ।
यस्तु पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
यमुद्दिश्य त्वया देयस्तस्मिन् पिण्डो मृते प्रभो ! ॥
एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
अन्तकाले गते मह्यं त्वया देयो गया शिरे ।”

इति च वायुपुराणे गयामाहात्म्ये ४ अध्यायः ॥

गरं, क्ली, (गिरति दोषबहुलं नाशयति स्वस्मिन् जातस्य बालकस्येति भावः । ग + पचाद्यच् ।) ववादिकादशकरणान्तर्गतपञ्चमकरणम् । इति मेदिनी । रे । २२ ॥ (यथा, बृहत्संहिता-याम् । ९९ । ४ ।

“ववबालवकौलवतैतिलाख्य
गरवणिजविष्टिसंज्ञानाम् ।”

एतेषामधीशाः । यथा, तत्रैव । ९९ । ४-५ ।

“ पतयः सुरेन्द्रकमलज-
मित्रार्य्यमभूश्रियः सयमाः ॥
कृष्णचतुर्द्दश्यर्द्धाद् ध्रुवाणि
शकुनिश्चतुष्पदं नागम् ।
किन्तुघ्नमिति च तेषां
कलिवृषफणिमारुताः पतयः ॥”)

तत्र जातस्य फलम् ।

“विचारदक्षो विजितारिपक्षः
शूरोऽतिधीरो गृहदारयुक्तः ।
दाता दयालुर्गुणवान्नरः स्याद्
गरे परेषामुपकारकर्त्ता ॥”

इति कोष्ठीप्रदीपः ॥

(गरादेः फलं यथा, बृहत्संहितायाम् । ९९ । ७ ।

“कृषिवीजगृहाश्रयजानि गरे
वणिजि ध्रुवकार्य्यवणिग्युतयः ॥”

गीर्य्यते भक्ष्यते इति । गॄ + कर्म्मणि अप् ।) विषम् । (यथा, भागवते । ८ । ७ । ४१ ।

“तस्मादिदं गरं भुञ्जे प्रजानां स्वस्तिरस्तु मे ॥”)

वत्सनाभाख्यविषम् । इति राजनिर्घण्टः ॥ (सम्मोहनं विषम् । इति माधवकरकृतरुग्वि-निश्चयटीकाकृता श्रीकण्ठदत्तेनोदररोगव्याख्याने उक्तम् ॥)

गरः, पुं, (गीर्य्यते इति । गॄ + कर्म्मणि अप् ।) विषम् । (यथा, भागवते । ६ । १४ । ४३ ।

“विद्वेषनष्टमतयः स्त्रियो दारुणचेतसः ।
गरं ददुः कुमाराय दुर्म्मर्षा नृपतिं प्रति ॥”)

उपविषम् । रोगः । इति हेमचन्द्रः । ४ । ३८० ॥

गरघ्नः, पुं, (गरं विषं हन्तीति । हन् + टक् ।) कृष्णार्जकः । वर्व्वरः । इति राजनिर्घण्टः ॥

गरघ्नी, स्त्री, (गरघ्न + टित्वात् ङीप् ।) मत्स्य-विशेषः । गरुइ इति भाषा । अस्या गुणाः । मधुरत्वम् । कषायत्वम् । वातपित्तकफनाशित्वम् । रुचिबलवीर्य्यकारित्वम् । दीपनत्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥